नास्तित्वविवादः सम्भवति । मदीया भूः प्रागविद्यमानभोगैव भुज्यत इत्युक्ते न सन्तता चिरन्तन्येव मे भुक्तिरित्यभोगभुक्तौ विवादः । इयं मर्य्यादेयन्त्वेति सीमाविवाद इति षट्प्रकार एव विवादः सम्भवति । षट्प्रकारेऽपि भूविवादे न्यूनत्वर्थाभ्यां सीमाया अपि निर्णीयमानत्वात् सीमानिर्णयप्रकरणे तस्यान्तर्भावः । समन्ताद्भवाः सामन्ताः । चतसृषु दिक्ष्वनन्तरा ग्रामादयस्ते च प्रतिसीमं व्यवस्थिताः ।

"ग्रामो ग्रामेषु सामन्तः चैत्रं चैत्रस्य कीर्त्तितम् ।
गृहं गृहस्य निर्द्दिष्टं समन्तात् परिरभ्य हि ॥"

इति कात्यायनवचनात् । ग्रामादिशब्देन तत्स्थाः पुरुषा लक्ष्यन्ते । ग्रामः पलायत इति यथा । सामन्तग्रहणञ्च तत्संसक्तादुपलक्षणार्थम् । उक्तञ्च कात्यायनेन ।

"संसक्तकास्तु सामन्तास्तत्संसक्तास्तथोत्तराः ।
संसक्तसक्तसंसक्ताः पद्माकाराः प्रकीर्त्तिताः ॥"

इति । स्थविरा वृद्धाः । आदिग्रहणेन मौलोद्धृतयोर्ग्रहणम् । वृद्धादिलक्षणञ्च तेनैवोक्तम् ।

"निष्पाद्यमानं यैर्दृष्टं तत् कार्य्यं तद्गुणान्वितैः ।
वृद्धा वा यदि वाऽवृद्धास्ते च वृद्धाः प्रकीर्त्तिताः ॥
ये तत्र पूर्व्वं सामन्ताः पश्चाद्देशान्तरं गताः ।
तन्मूलत्वात्तु ते मौला ऋषिभिः परिकीर्त्तिताः ॥
उपश्रवणसम्भोगकार्य्याख्यानोपचिह्निताः ।
उद्धरन्ति पुनर्यस्मादुद्धृतास्ते ततः स्मृताः ॥"

गोपा गोचारकाः ।

"सीमाकर्षणाः सीमासंनिहितक्षेत्रकर्षकाः ।"

सर्व्वे च वनगोचरा वनचारिणो व्याधादयस्ते च मनुनोक्ताः ।

"व्याधान् शाकुनिकान् गोपान् कैवर्त्तान् मूलखातकान् ।
व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनगोचरान् ॥"

स्थलमुन्नतो भूप्रदेशः । अङ्गारोऽग्नेरुच्छिष्टम् । तुषा धान्यत्वचः । द्रुमा न्यग्रोधादयः । सेतुर्जलप्रवाहबन्धः । चैत्यं पाषाणादिबन्धः । आद्यशब्देन वेणुवालुकादीनां ग्रहणम् । एतानि च प्रकाशाप्रकाशभेदेन द्विःप्रकाराणि । तथा च मनुः ।

"सीमावृक्षांस्तु कुर्व्वीत न्यग्रोधाश्वत्थकिंशुकान् शाल्मलीन् शालतालांश्च क्षीरिणश्चैव पादपान् ॥
गुल्मान् वेणूंश्च विविधान् शमी वल्ली स्थलानि च ।
शरान् कुब्जकगुल्मांश्च तथा सीमा न नश्यति ॥
तड़ागान्युदपानानि वाप्यः प्रस्रवणानि च ।
सीमासन्धिषु कार्य्याणि देवतायतनानि च ॥"

इति प्रकाशरूपाणि ॥

"उपच्छन्नानि चान्यानि सीमालिङ्गानि कारयेत् ।
सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्य्ययम् ॥
अश्मनोऽस्थीनि गोवालांस्तुषान् भस्मकपालिकाः ।
करीषमिष्टकाङ्गारशर्करावालुकास्तथा ॥
यानि चैवं प्रकाराणि कालाद्भूमिर्न भक्षयेत् ।
तानि सन्धिषु सीमाया अप्रकाशानि कारयेत् ॥
एतैर्लिङ्गैर्नयेत् सीमां राजा विवदमानयोः ॥"

प्रच्छन्नलिङ्गानि एतैः प्रकाशाप्रकाशरूपैर्लिङ्गैः सामन्तादिप्रदर्शितैः सीमां प्रति विवदमानयोः सीमानिर्णयं कुर्य्याद्राजा ॥ * ॥ यदा पुनश्चिह्नानि न सन्ति विद्यमानानि वा लिङ्गालिङ्गतया सन्दिग्धानि तदा निर्णयोपायमाह ।

"सामन्ता वा समग्रामाश्चत्वारोऽष्टौ दशापि वा रक्तस्रग्वसनाः सीमां नयेयुः क्षितिधारिणः ॥"

सामन्ताः पूर्व्वोक्तलक्षणाः । समग्रामाश्चत्वारोऽष्टौ दशापि वा इत्येवं समसंख्याः प्रत्यासन्नग्रामीणाः । रक्तस्रग्विणो रक्ताम्बरधराः मूर्द्धारोपितक्षितिखण्डाः सीमानं नयेयुः प्रदर्शयेयुः सामन्ता वेति विकल्पाभिधानं स्मृत्युत्तरोक्तसाक्ष्यभिप्रायम् । यथाह मनुः ।

"साक्षिप्रत्यय एव स्यात् सीमावादविनिर्णयः ।"

तत्र च साक्षिणां निर्णेतृत्वं मुख्यं तदभावे सामन्तानाम् । तदुक्तम् ।

"साक्ष्यभावे तु चत्वारो ग्रामाः सीमन्तवासिनः सीमाविनिर्णयं कुर्य्युः प्रयता राजसन्निधौ ॥"

तदभावे तत्संसक्तादीनां निर्णेतृत्वम् । यथाह कात्यायनः ।

"स्वार्थसिद्धौ प्रदुष्टेषु सामन्तेष्वर्थगौरवात् ।
तत्संसक्तैस्तु कर्त्तव्य उद्धारो नात्र संशयः ॥
संसक्तसक्तदोषे तु तत्संसक्ताः प्रकीर्त्तिताः ।
कर्त्तव्या न प्रदुष्टास्तु राज्ञा धर्म्मं विजानता ॥"

सामन्ताद्यभावे मौलादयो ग्राह्याः । तेषामभावे सामन्ता मौलवृद्धोद्धृतादयः । स्थावरे षट्प्रकारेऽपि कार्य्या नात्र विचारणेति कात्यायनेन क्रमविधानात् । एते च सामन्तादयः संख्यागुणातिरेकेण संभवन्ति ।

"सामन्ताः साधनं पूर्व्वं निर्दोषाः स्युर्गुणान्विताः ॥
द्विगुणास्तूत्तरा ज्ञेयास्ततोऽन्ये त्रिगुणा मताः
इति स्मरणात् ॥ * ॥

ते च साक्षिणः सामन्तादयश्च स्वैः स्वैः शपथैः शापिताः सन्तः सीमां नयेयुः ।

"शिरोभिस्ते गृहीत्वोर्व्वीं स्रग्विणो रक्तवाससः सुकृतैः शापिताः स्वैः स्वैर्नयेयुस्ते समञ्जसम् ॥
इति स्मरणात् ॥

नयेयुरिति बहुवचनं द्वयोर्निरासार्थं नैकस्य ।

"एकश्चेदुन्नयेत् सीमां सोपवासः समुन्नयेत् ।
रक्तमाल्याम्बरधरो भूमिमादाय मूर्द्धनि ॥"

इति नारदेनैकस्याभ्यनुज्ञानात् । यत्तु ।

"नैकः समुन्नयेत् सीमां नरः प्रत्ययवानपि ।
गुरुत्वादस्य कार्य्यस्य क्रियैषा बहुषु स्थिता ॥"

इत्येकस्य निषेधः । स उभयानुमतधर्म्मविद्व्यतिरिक्तविषय इत्यविरोधः ॥ * ॥ स्थलादिचिह्नाभावेऽपि साक्षिसामन्तादीनां सीमाज्ञान उपायविशेषो नारदेनोक्तः ।

"निम्नगापहृतोत्सृष्टनष्टचिह्नासु भूमिषु ।
तत्प्रदेशानुमानाच्च प्रमाणाद्भोगदर्शनात् ॥"

निम्नगाया नद्या अपहृतेनापहरणेनोत्सृष्टानि स्वस्थानात् प्रच्युतानि नष्टानि वा लिङ्गानि यासु मर्य्यादाभूमिषु तत्र तत्प्रदेशानुमानात् उत्सृष्टनष्टचिह्नानां प्राचीनप्रदेशानुमानाद् ग्रामादारभ्य सहस्रदण्डपरिमितं क्षेत्रमस्य ग्रामस्य पश्चिमे भाग इत्येवं विधानात् प्रमाणाद्वा प्रत्यर्थिसमक्षमविप्रतिपन्नायाः स्मार्त्तकालोपलक्षितैर्भुक्तैर्वा निश्चिनुयुः । बृहस्पतिना चात्र विशेषो दर्शितः ।

"आगमञ्च प्रमाणञ्च भोगं कालञ्च नाम च ।
भूभागलक्षणञ्चैव ये विदुस्तेऽत्र साक्षिणः ॥"

एते च साक्षिसामन्तादयः शपथैः शापिताः सन्तः कुलादिसमक्षं राज्ञा प्रष्टव्याः । यथाह मनुः ।

"ग्रामेयककुलानान्तु समक्षं सीम्नि साक्षिणः ।
प्रष्टव्याः सीमलिङ्गानि तयोश्चैव विवादिनोः ॥
ते पृष्टाः साक्ष्यादयः समस्ता ऐकमत्येन सीम्नि निर्णयं कुर्य्युः । तैर्निर्णीतां सीमां तत्प्रदर्शितसकललिङ्गयुक्तां साक्ष्यादिनामान्वितां स्वविस्मरणार्थं पत्रे समारोपयेत् । उक्तञ्च मनुना ।

"ते पृष्टास्तु यथा ब्रूयुः सामन्ताः सीम्नि निर्णयम् ।
निबध्नीयात्तथा सीमां सर्व्वांस्तांश्चैव नामतः ॥

एतेषां साक्षिसामन्तप्रभृतीनां सीमाचंक्रमणदिनादारभ्य यावत् त्रिपक्षं राजदैविकं व्यसनं चेन्नोपपद्यते तदा तत्प्रदर्शनात् सीमानिर्णयः । अयञ्च राजदैविकव्यसनावधिः कात्यायनोक्तः ।

"सीमाचंक्रमणे कोषे पादस्पर्शे तथैव च ।
त्रिपक्षपक्षसप्ताहं दैवराजिकमिष्यते ॥" इति ॥

यदा त्वमीषां उक्तसाक्ष्यवचसां त्रिपक्षाभ्यन्तरे रोगादिर्दृश्यते । अथवा प्रतिवादिनिर्द्दिष्टाभ्यधिकसंख्यागुण-साक्ष्यन्तरविरुद्धवचनता तदा ते मृषाभाषितया दण्डनीयाः । तदाह ।

"अनृते तु पृथग्दण्ड्या राज्ञा मध्यमसाहसम् ॥
अनृते मिथ्यावदने निमित्तभूते सति सर्व्वसामन्ताः प्रत्येकं मध्यमसाहसेन चत्वारिंशदधिकेन पणपञ्चशतेन दण्डनीयाः । सामन्तविषयता चास्य साक्षमौलादीनां स्मृत्यन्तरे दण्डान्तरविधानादवगम्यते । तथा च मनुः ।

"यथोक्तेन नयन्तस्ते पूयन्ते सत्यसाक्षिणः ।
विपरीतं नयन्तस्तु दाप्याः स्युर्द्विशतं दमम् ॥"

नारदोऽपि ।

"अथ चदनृतं ब्रूयुः सामन्ताः सीम्नि निर्णये ।
सर्व्वे पृथक् पृथक् दण्ड्या राज्ञा मध्यमसाहसम् ॥"

सामन्तानां मध्यमसाहसं दण्डमभिधाय ।

"शेषाश्चेदनृतं ब्रूयुर्नियुक्ता भूमिकर्म्मणि ।
प्रत्येकन्तु जघन्यास्ते विनयाः पूर्व्वसाहसम् ॥"